# संस्कृतवार्ता:

**दिनाङ्क : - 19.01.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**‘मन की बात’-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य एकादशवादने स्वीये ‘मन की बात’ इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। ‘मन की बात’ इत्यस्य मासिक-कार्यक्रमस्य इदम् अष्टदशाधिकैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

---------------------------------------

**अमितशाहः आन्ध्रप्रदेशस्य**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य आन्ध्रप्रदेशस्य विजयवाडानगरे एन्. डी. आर्. एफ्. इत्यस्य विंशतिः तम:-स्थापना-दिवस-समारोहे भागं ग्रहीष्यति। अस्मिन् अवसरे गृहमन्त्रिणः द्विशतकोटिरूप्यकाणां परियोजनानां उद्घाटनम्, शिलान्यासं च विधास्यति। अत्रावधौ तावत् राष्ट्रिय-विपद्-व्यवस्थापन-संस्थानस्य दक्षिण-परिसरः, एन्. डी. आर्. एफ़्. इत्यस्य दश तम-बटालियन् इत्यस्य परिसरः, सुपौल्-नगरस्य क्षेत्रीयप्रतिक्रिया-केन्द्रस्य परिसरः इत्यादयः त्रीणि महत्त्वपूर्णानि केन्द्राणि अद्य उद्घाट्यन्ते। श्री शाह: हैदराबाद्-नगरस्य राष्ट्रिय-आरक्षक-अकादम्यां (एन्. पी. ए.) नूतनस्य 'इन्टेग्रेटेड्-इन्डोर्-शूटिङ्ग्-रेञ्ज्' इत्यस्य आधारशिलाम् अपि स्थापयिष्यति।

---------------------------------------

**महा-कुम्भ-मेला**

आध्यात्मिक सङ्गमनगरे प्रयागराजे महा-कुम्भ-मेलायां देशस्य विभिन्नेभ्यः क्षेत्रेभ्य: श्रद्धालवः तीर्थयात्रिण्श्च समागता: । सम्प्रति यावत् द्विसप्तति: लक्षोत्तर सप्तकोटितोप्यधिक श्रद्धालव: महाकुम्भे भागं अगृह्णन्। सममेव त्रिवेणीसङ्गमे स्नानं च अकुर्वन्। सङ्गमं विहाय महाकुम्भ-मेलया अपि अशेषे हि उत्तरप्रदेशे पर्यटनं वर्धिता अस्ति। महाकुंभे विभिन्नेभ्यः देशेभ्यः श्रध्दालव: अधुना उत्तरप्रदेशस्य अन्येषु तीर्थस्थानेषु जनसम्मर्दं कुर्वन्ति। अयोध्या, वाराणसी, विन्ध्याचलशृङ्गवेर्पुर, चित्रकूट इत्यादिषु पवित्रस्थानेषु पर्यटकानां संख्या तीव्ररूपेण वर्धिता अस्ति।

---------------------------------------

**इजराइल-युद्धविरामः**

इस्रायेल्-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहु-वर्यः आग्रहम् अकरोत् यत् अद्य प्रथम-चरणे विमोचितानां त्रयस्त्रिंशत् बन्धकानां नाम्नां सूचीं यावत् हमास्-संस्था न प्रददाति तावत् इस्रायेल्-देशः गाजा-युद्धविराम-सन्धिं न प्रवर्तयिष्यति इति। अद्य युद्धविराम-सन्धेः कतिपयघण्टाभ्यः पूर्वम् असौ एतत् अवोचत्। नेतन्याहु-वर्यः अवोचत् यत् इस्रायेल्-देशः युद्धविराम-सन्धेः कस्यापि उल्लंघनं न सहति, अपि च हमास्-संस्थां पूर्णतया उत्तरदायित्वेन स्वीकरोति।

---------------------------------------

**निर्वाचनयोगः-नामाङ्कनप्राप्तांशः**

सप्तति-सदस्यात्मिकायाः दिल्ली-विधानसभायाः निर्वाचनार्थम् आहत्य एकविंशत्यधिक-पञ्चशतोत्तरसहस्रं नामाङ्कनानि पञ्जीकृतानि। निर्वाचनायोगानुसारि नामाङ्कनस्य अन्तिमदिने अशीत्युत्तर-षड्शतं नामाङ्कनपत्राणि समाङ्कितानि। आयोगेन प्रोक्तं यत् नवदिल्लीविधानसभा-क्षेत्रे सर्वाधिक-नामाङ्कन-पत्राणि पञ्जीकृतानि।

---------------------------------------

**खो-खो**

खो-खो इति विश्व चषक प्रतिस्पर्धायां ह्यः भारतीय-पुरुष-महिला-दले उपान्त्यस्पर्धासु स्वस्य प्रभावपूर्णं प्रदर्शनं कृत्वा अन्तिमस्पर्धायां स्वस्थानं प्राप्तवत्यौ।

---------------------------------------

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतःभविष्यति।

**।।।इति वार्ताः।।**